# || श्री काशी क्षेत्रे ५६ विनायक नाम स्तोत्र ||

---

।श्री गणेशाय नमः।

। श्री स्वामी सामर्थाय नमः ।

नमो विघ्नहर्ता नमो गणाधीशा गणनायका गणपती च नमो विनायकं ।

श्री विश्वेश्वरस्य आवर्णम करोती

सूत उवाच :-

गच्छता व्योम मार्गेण पृष्टा दूता महात्मना ।

वाराणसी-स्थितानां तु गणेशानां महात्मनाम़ ।

नामानि परिवाराणां तानि नः शृणुतानघाः ।

राजोवाच :-

दूता वदंतु कृपया विश्वेश परिवारगाऩ ।

गणेशान्मम कातस्तन्र्येन स्मरणात-सर्व-सिद्धिदान ।

दूता ऊचुः।

कथयामः समासेन विश्वेशावरणे गता़न ।

गणेशान्क्रमशो राजञ्शृणु सर्वभयापहान ।

दुर्गाविनायकोऽथार्क भीमचण्डी विनायकः।

देहलीगणपश्चाथ तथोद्दण्डविनायकः ।

पाशपाणीः सर्वविघ्न हरणोऽथ विनायकः।

प्रथमावरणे सिद्ध-सिद्धि-रूपो विनायकः।

लम्बोदरः कुटदंतः शूलटंक विनायकः।

कुष्माण्डाख्यश्चतुर्थश्च पंचमो मुण्डसंज्ञकः।

विकट-द्विज-संज्ञस्तु राजपुत्र-विनायकः।

प्रणवाख्योऽथापरश्च द्वितीयावरणे स्थिताः ।

वक्रतुण्ड एकदन्तस्त्रिमुखश्च विनायकः।
पंचास्यश्चापरशचात्र हेरम्बश्च विनायकः।
विघ्नराजोऽपरश्चापि वरदश्च विनायकः।
मोदकप्रिय इत्येव तृतीयावरणे स्तिताः।

विनायकोऽभयप्रदः सिंहतुण्ड -विनायकः।
कुणिताक्षश्चापरश्च क्षिप्रप्रसादसंज्ञकः ।
चिंतामणिरिति ख्यातो दंतहस्त-विनायकः।
प्रचंडश्चाप्य-परश्चोद्दण्डमुण्डविनायकौ ।
चतुर्थावरणे ज्ञेया अष्टावेते विनायकः।

स्थूलदन्तो द्वितीयस्तु कलिप्रिय-विनायकः।
चतुर्दन्तो द्वितुण्दाख्वो ज्येष्ठो गज-विनायकः।
कालाख्यश्च तथा ज्ञेयो मार्गेशाख्योपरोऽपि च।
पंचमावरणे ज्ञेया अष्टावेते विनायकः।

मणिकर्णि-विनायक आशासृष्टि-विनायकः।
यक्षाख्यो गजकर्णाख्यश्चित्र-धण्ट-विनायकः।
सुमंगलश्च मित्राख्य एते षष्ठे-विनायकः।

मोदः प्रमोदः सुमुखो दुर्मुखश्च विनायकः।
गणपाख्योथापरश्च तथा ज्ञेयो ज्ञान विनायकः।
सप्तमावरणे ज्ञेया स्तथा द्वार-विनायकः।

अविमुक्तोऽष्टमो यत्र मोक्षदोऽथ विनायकः।

अन्यो भगीरथाख्यो हि हरिश्चन्द्र-विनायकः।

कपर्दीति परो ज्ञेय-स्तथा बिंदु-विनायकः।

एतेषां स्मरणं नित्यं सर्वकामफलप्रदम् ।
प्राथरुत्थाय यश्चैतान्पठते शुद्धमानसः।
न तस्य विघ्ना विघ्नं हि कुर्वन्ति सर्वकर्मसु ।
एकैकनाम्ना दाजेन्द्र दुर्वाभिस्तन्दुलैरपि ।
तिलैः-शमी-दलैश्चैतान्पुजयेद्र-भक्तिमान्नरः।
असाध्यं साधयेतकार्यं सर्वत्र विजयी भवेत ।
आयुष्यं पुष्टिमारोग्यं प्राप्नुयाद्धनमुत्तमम् ।
इदं ते कथितं सर्वं यद्धि पृष्टं त्वया नृप ।
तृष्णिं ययुर्देवदूतास्ततो धाम निजं मुदा ।
इती श्री गणेशपुराणे क्रीडाखंडे चतुःपंचाशदुत्तरशततमोध्याये
षटपंचाशद-विनायक वर्णनम संपूर्णम ।

॥ श्रीगुरुदत्तात्रेयार्पणमस्तु ॥

|| श्री स्वामी समर्थार्पण मस्तु||

---